# shrIhanumadaShTakaM

# શ્રીહનુમદષ્ટકમ્

## Document Information

Text title : hanumadaShTakaM 2

File name : hanumadaShTakaM.itx

Category : aShTaka, hanumaana

Location : doc_hanumaana

Transliterated by : Processed by Sowmya Ramkumar

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : September 19, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીહનુમદષ્ટકમ્

શ્રીરઘુરાજપદાબ્જનિકેતન પઙ્કજલોચન મઙ્ગલરાશે
    ચણ્ડમહાભુજદણ્ડસુરારિવિખણ્ડનપણ્ડિત પાહિ દયાલો ।
પાતકિનં ચ સમુદ્ધર માં મહતાં હિ સતામપિ માનમુદારં
    ત્વાં ભજતો મમ દેહિ દયાઘન હે હનુમન્ સ્વપદામ્બુજદાસ્યમ્ ॥ ૧॥

સંસૃતિતાપમહાનલદગ્ધતનૂરુહમર્મતનોરતિવેલં
    પુત્રધનસ્વજનાત્મગૃહાદિષુ સક્તમતેરતિકિલ્બિષમૂર્તેઃ ।
કેનચિદપ્યમલેન પુરાકૃતપુણ્યસુપુઞ્જલવેન વિભો વૈ
    ત્વાં ભજતો મમ દેહિ દયાઘન હે હનુમન્ સ્વપદામ્બુજદાસ્યમ્ ॥ ૨॥

સંસૃતિકૂપમનલ્પમઘોરનિદાઘનિદાનમજસ્રમશેષં
    પ્રાપ્ય સુદુઃખસહસ્રભુજઙ્ગવિષૈકસમાકુલસર્વતનોર્મે ।
ઘોરમહાકૃપણાપદમેવ ગતસ્ય હરે પતિતસ્ય ભવાબ્ધૌ
    ત્વાં ભજતો મમ દેહિ દયાઘન હે હનુમન્ સ્વપદામ્બુજદાસ્યમ્ ॥ ૩॥

સંસૃતિસિન્ધુવિશાલકરાલમહાબલકાલઝષગ્રસનાર્તં
    વ્યગ્રસમગ્રધિયં કૃપણં ચ મહામદનક્રસુચક્રહૃતાસુમ્ ।
કાલમહારસનોર્મિનિપીડિતમુદ્ધર દીનમનન્યગતિં માં
    ત્વાં ભજતો મમ દેહિ દયાઘન હે હનુમન્સ્વપદામ્બુજદાસ્યમ્ ॥ ૪॥

સંસૃતિઘોરમહાગહને ચરતો મણિરઞ્જિતપુણ્યસુમૂર્તેઃ
    મન્મથભીકરઘોરમહોગ્રમૃગપ્રવરાર્દિતગાત્રસુસન્ધેઃ ।
મત્સરતાપવિશેષનિપીડિતબાહ્યમતેશ્ચ કથઞ્ચિદમેયં
    ત્વાં ભજતો મમ દેહિ દયાઘન હે હનુમન્સ્વપદામ્બુજદાસ્યમ્ ॥ ૫॥

સંસૃતિવૃક્ષમનેકશતાઘનિદાનમનન્તવિકર્મસુશાખં
    દુઃખફલં કરણાદિપલાશમનઙ્ગસુપુષ્પમચિન્ત્યસુમૂલમ્ ।
તં હ્યધિરુહ્ય હરે પતિતં શરણાગતમેવ વિમોચય મૂઢં
    ત્વાં ભજતો મમ દેહિ દયાઘન હે હનુમન્સ્વપદામ્બુજદાસ્યમ્ ॥ ૬॥

સંસૃતિપન્નગવક્ત્રભયઙ્કરદંષ્ટ્રમહાવિષદગ્ધશરીરં
    પ્રાણવિનિર્ગમભીતિસમાકુલમન્દમનાથમતીવ વિષણ્ણમ્ ।
મોહમહાકુહરે પતિતં દયયોદ્ધર મામજિતેન્દ્રિયકામં
    ત્વાં ભજતો મમ દેહિ દયાઘન હે હનુમન્ સ્વપદામ્બુજદાસ્યમ્ ॥ ૭॥

ઇન્દ્રિયનામકચૌરગણૈર્હૃતતત્ત્વવિવેકમહાધનરાશિં
    સંસૃતિજાલનિપાતિતમેવ મહાબલિભિશ્ચ વિખણ્ડિતકાયમ્ ।
ત્વત્પદપદ્મમનુત્તમમાશ્રિતમાશુ કપીશ્વર પાહિ કૃપાલો
    ત્વાં ભજતો મમ દેહિ દયાઘન હે હનુમન્સ્વપદામ્બુજદાસ્યમ્ ॥ ૮॥

બ્રહ્મમરુદ્ગણરુદ્રમહેન્દ્રકિરીટસુકોટિલસત્પદપીઠં
    દાશરથિં જપતિ ક્ષિતિમણ્ડલ એષ નિધાય સદૈવ હૃદબ્જે ।
તસ્ય હનૂમત એવ શિવઙ્કરમષ્ટકમેતદનિષ્ટહરં વૈ
    યઃ સતતં હિ પઠેત્સ નરો લભતેઽચ્યુતરામપદાબ્જનિવાસમ્ ॥ ૯॥

ઇતિ અચ્યુતયતિકૃતં હનુમદષ્ટકં સમ્પૂર્ણમ્ ।

(One reference attributes to પણ્ડિતશ્રીશિવદત્તમિશ્રશાસ્ત્રિરચિતે)

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*shrIhanumadaShTakaM*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*